# अध्यायः ४

# ज्ञानकर्मसंन्यासयोगः

योऽयं योगोऽध्याय-द्वयेनोक्तो ज्ञान-निष्ठा-लक्षणः ससंन्यासः कर्म-योगोपायो यस्मिन् वेदार्थः

परिसमा”ाः प्रवृत्ति-लक्षणो निनृत्ति-लक्षणश्च, गीतासु च सर्वास्वयमेव योगो विवक्षितो भगवता।

अतः परिसमा”ां वेदार्थं मन्वानस्तं वंश-कथनेन स्तौति श्रीभगवान् -

**श्रीभगवानुवाच -**

**इमं विवस्वते योगं प्रोक्तवान् अहमव्ययम्।**

**विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ।। १।।**

अहम् इमं अव्ययम् योगं विवस्वते प्रोक्तवान् । विवस्वान् मनवे प्राह । मनुः इक्ष्वाकवे अब्रवीत् ।।

*Śrī Bhagavān* said:
I taught this imperishable *yoga* to *Vivasvān*, *Vivasvān* taught it to *Manu*, (and) *Manu* taught it to *ikṣvāku*.

इममिति। इमम् अध्याय-द्वयेनोक्तं योगं विवस्वते आदित्याय सर्गादौ प्रोक्तवान् अहम्

जगत्परिपालयितॄणां क्षत्रियाणां बलाधानाय।

तेन योग-बलेन युक्ताः समर्था भवन्ति ब्रह्म परिरक्षितुम्।

ब्रह्म-क्षत्रे परिपालिते जगत्परिपालयितुमलम्। अव्ययम् अव्यय-फलत्वात्।

न ह्यस्य सम्यग्दर्शन-निष्ठा-लक्षणस्य मोक्षाख्यं फलं व्येति। स च विवस्वान् मनवे प्राह।

मनुरिक्ष्वाकवे स्वपुत्रायाऽऽदिराजाय अब्रवीत्।। १ ।।

**एवं परम्पराप्रा’’ं इमं राजर्षयो विदुः।**

**स कालेनेह महता योगो नष्टः परन्तप।। २।।**

एवं राजर्षयः परम्पराप्रा’’ं इमं (योगं) विदुः। परन्तप सः योगः इह महता कालेन नष्टः ।।

Handed down from generation to generation in this way, the kings who were sages knew it. (But) with the long lapse of time, O *Arjuna*, this *yoga* has declined in the world.

एवमिति। एवं क्षत्रिय-परम्पराप्रा’’म् इमं राजर्षयः राजानश्च त ऋषयश्च राजर्षयो विदुः इमं

योगम्। स योगः कालेनेह महता दीर्घेण नष्टो विच्छिन्न-संप्रदायः संवृत्तः।

हे परन्तप आत्मनो विपक्ष-भूताः परे उच्यन्ते।

ताञ्शौर्यतेजो-गभस्तिभिर्भानुः इव तापयतीति परन्तपः, शत्रुतापन इत्यर्थः।। २ ।।

दुर्बलानजितेन्द्रियान् प्राप्य नष्टं योगमिममुपलभ्य लोकं चापुरुषार्थ-सम्बन्धिनम्   -

**स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः।**

**भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम्।। ३।।**

सः पुरातनः एव अयं योगः मया ते भक्तः असि मे सखा च इति अद्य प्रोक्तः। एतद् हि उत्तमं रहस्यम्।।
Today, that same ancient *yoga* has been told to you by Me because you are My devotee and My friend. This is indeed a profound secret.

स एवायमिति। स एवायं मया ते तुभ्यम् अद्य इदानीं योगः प्रोक्तः पुरातनः।

भक्तोऽसि मे सखा च असि इति रहस्यं हि यस्माद् एतदुत्तमं योगो ज्ञानमित्यर्थः।। ३ ।।

भगवता विप्रतिषिद्धमुक्तमिति मा भूत् कस्यचिद् बुद्धिरिति परिहारार्थं चोद्यमिव कुर्वन् -

**अर्जुन उवाच**

**अपरं भवतो जन्म परं जन्म विवस्वतः।**

**कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति।। ४।।**

भवतः जन्म अपरम् । विवस्वतः जन्म परम्। त्वम् आदौ प्रोक्तवान् इति एतद् कथं विजानीयाम् ।। ४

*Arjuna* said:
Your birth was not so long ago; (whereas) *Vivasvān's* birth was a long time ago. How am I to know that you told this (to *Vivasvān*) in the beginning?

अपरमिति। अपरम् अर्वाग् वसुदेव-गृहे भवतो जन्म।

परं पूर्वं सर्गादौ जन्म उत्पत्तिः विवस्वतः आदित्यस्य। तत् कथमेतद्विजानीयाम् अविरुद्धार्थतया यः

त्वम् एव आदौ प्रोक्तवान् इमं योगं स एव त्वमिदानीं मह्यं प्रोक्तवानसि इति।। ४ ।।

या वासुदेवेऽनीश्वरासर्वज्ञाशङ्का मूर्खाणां तां परिहरन् श्रीभगवानुवाच यदर्थो ह्यर्जुनस्य प्रश्नः -

**श्री भगवानुवाच**

**बहूनि मे व्यतीतानि जन्मानि तव चार्जुन।**

**तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप।। ५**

अर्जुन मे तव च बहूनि जन्मानि व्यतीतानि । अहं तानि सर्वाणि वेद । परन्तप त्वं न वेत्थ ।। ५
विद ज्ञाने २.प.प. लट् (२ types) वेत्ति वित्तः विदन्ति। वेत्सि वित्थः वित्थ। वेद्मि विद्वः विद्मः।
वेद विदतुः विदुः। वेत्थ विदथुः विद । वेद विद्व विद्म।

*Śrī Bhagavān* said:
Many births have passed for Me and you, O *Arjuna*! I know them all (whereas) you do not know O Scorcher of foes!

बहूनीति। बहूनि मे मम व्यतीतानि अतिक्रान्तानि जन्मानि तव च हे अर्जुन।

तान्यहं वेद जाने सर्वाणि न त्वं वेत्थ जानीषे धर्माधर्मादि-प्रतिबद्ध-ज्ञान-शक्तित्वात्।

अहं पुनः नित्य-शुद्ध-बुद्ध-मुक्त-स्वभावत्वाद् अनावरण-ज्ञान-शक्तिरिति वेदाहं हे परन्तप।। ५ ।।

कथं तर्हि तव नित्येश्वरस्य धर्माधर्माभावेऽपि जन्मेत्युच्यते -

**अजोऽपि सन् अव्ययात्मा भूतानामीश्वरोऽपि सन्।**

**प्रकृतिं स्वाम् अधिष्ठाय सम्भवाम्यात्ममायया।। ६।।**

अजः अव्ययात्मा अपि सन् भूतानाम् ईश्वरः अपि सन् स्वां प्रकृतिम् अधिष्ठाय आत्ममायया सम्भवामि ।। ६

Even though, being one who is unborn, one whose knowledge does not wane, and also being the Lord of all living beings, still, wielding My own *prakṛti*, I, 'as though' come into being by My own creative power.

अजोऽपीति। अजोऽपि जन्म-रहितोऽपि सन् तथा अव्ययात्मा अक्षीण-ज्ञान-शक्ति-स्वभावोऽपि सन् तथा भूतानां ब्रह्मादि-स्तम्ब-पर्यन्तानाम् ईश्वरः ईशन-शीलः अपि सन् प्रकृतिं स्वां मम वैष्णवीं मायां त्रिगुणात्मिकां यस्या वशे सर्वं जगद्वर्त्तते यया मोहितं सत् स्वमात्मानं वासुदेवं न जानाति तां प्रकृतिं स्वाम् अधिष्ठाय वशीकृत्य सम्भवामि देहवान् इव भवामि, जात इव आत्ममायया आत्मनो मायया, न परमार्थतो लोकवत्।। ६ ।।

तच्च जन्म कदा, किमर्थं चेत्युच्यते -

**यदा यदा हि धर्मस्य गलानिर्भवति भारत।**

**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।। ७।।**

भारत यदा यदा हि धर्मस्य गलानिः भवति अधर्मस्य अभ्युत्थानं (भवति) तदा अहम् आत्मानं सृजामि ।।

O *Arjuna*, whenever there is a decline in right living and an increase in wrong living everywhere, I bring Myself into being (assume a physical body).

यदेति। यदा यदा हि धर्मस्य ग्लानिः हानिर्वर्णाश्रमादि-लक्षणस्य प्राणिनामभ्युदय-निःश्रेयस-

साधनस्य भवति भारत, अभ्युत्थानम् उद्भवः अधर्मस्य तदात्मानं सृजामि अहं मायया।। ७ ।।

किमर्थम् -

**परित्राणाय साधूनां विनाशाय च दुष्कृताम्।**

**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।। ८।।**

साधूनां परित्राणाय दुष्कृतां विनाशाय धर्मसंस्थापनार्थाय च युगे युगे (अहम्) सम्भवामि ।। ८

For the protection of those who are committed to *dharma* and the destruction (conversion) of those who follow *adharma*, and for the establishment of *dharma*, I come into being in every *yuga.*

परित्राणायेति। परित्राणाय परिरक्षणाय साधूनां सन्मार्गस्थानां, विनाशाय च दुष्कृतां पाप-

कारिणाम्। किञ्च धर्मसंस्थापनार्थाय धर्मस्य सम्यक्स्थापनं तदर्थं सम्भवामि युगे युगे प्रति-युगम्।।

८ ।।

तत् -

**जन्म कर्म च मे दिव्यं एवं यो वेत्ति तत्वतः।**

**त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन।। ९।।**

अर्जुन यः एवं मे दिव्यं जन्म कर्म च तत्वतः वेत्ति (सः) देहं त्यक्त्वा पुनर्जन्म न एति। माम् एति । ९

The one who knows in reality My divine birth and action in this way, O *Arjuna*, giving up the body, that person is not born again. He attains Me.

जन्मेति। जन्म माया-रूपं कर्म च साधु-परित्राणादि मे मम दिव्यम् अप्राकृतमैश्वरम् एवं

यथोक्तं यो वेत्ति तत्त्वतः तत्त्वेन यथावत् त्यक्त्वा देहम् इमं पुनर्जन्म पुनरुत्पत्तिं नैति न प्राप्नोति।

मामेति आगच्छति। सः मुच्यते हे अर्जुन।। ९ ।।

नैष मोक्षमार्गः इदानीं प्रवृत्तः। किं तर्हि? पूर्वमपि -

**वीतरागभयक्रोधाः मन्मया मामुपाश्रिताः।**

**बहवो ज्ञानतपसा पूता मद्भावमागताः।। १०।।**

वीतरागभयक्रोधाः मामुपाश्रिताः ज्ञानतपसा पूताः बहवः मन्मयाः मद्भावम् आगताः।। १०
Free from craving, fear, and anger, totally resolved in Me, taking refuge in Me, purified by the discipline of knowledge, many have come back to My nature.

वीतरागेति। वीतरागभयक्रोधाः रागश्च भयं च क्रोधश्च वीता विगता येभ्यः ते वीत-राग-भय-क्रोधाः। मन्मयाः ब्रह्म-विदः ईश्वराभेद-दर्शिनो माम् एव परमेश्वरम् उपाश्रिताः, केवल-ज्ञान-निष्ठा इत्यर्थः। बहवः अनेके ज्ञानतपसा ज्ञानमेव च परमात्म-विषयं तपः तेन ज्ञान-तपसा पूताः परां शुद्धिं गताः सन्तः मद्भावम् ईश्वरभावं मोक्षम् आगताः समनुप्राप्ताः।

इतर-तपो-निरपेक्ष-ज्ञान-निष्ठा इत्यस्य लिङ्गं ज्ञान-तपसेति विशेषणम्।। १० ।।

तव तर्हि राग-द्वेषौ स्तः, येन केभ्यश्चिदेवात्म-भावं प्रयच्छसि, न सर्वेभ्यः, इत्युच्यते -

**ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।**

**मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्वशः।। ११।।**

ये मां यथा प्रपद्यन्ते तान् तथा एव अहम् भजामि। पार्थ मनुष्याः सर्वशः मम वर्त्मा अनुवर्त्तन्ते ।। ११

Those who worship Me, in whatever way, I bless them in the same way. O *Arjuna*, people follow My path in all ways.

ये यथेति। ये यथा येन प्रकारेण, येन प्रयोजनेन, यत्फलार्थिना मां प्रपद्यन्ते तांस्तथैव तत्फल-

दानेन भजामि अनुगृह्णामि अहम् इत्येतत्। तेषां मोक्षं प्रत्यनर्थित्वात्।

न ह्येकस्य मुमुक्षुत्वं फलार्थित्वं च युगपत् सम्भवति।

अतो ये फलार्थिनः तान् फल-प्रदानेन, ये यथोक्त-कारिणः त्वफलार्थिनो मुमुक्षवश्च तान्

ज्ञान-प्रदानेन, ये ज्ञानिनः संन्यासिनो मुमुक्षवश्च तान् मोक्ष-प्रदानेन, तथा आर्त्तान् आर्त्ति-हरणेन,

इत्येवं यथा प्रपद्यन्ते ये तांस्तथैव भजामीत्यर्थः[१]।

न पुना राग-द्वेष-निमित्तं मोह-निमित्तं वा कञ्चिद्भजामि।

सर्वथापि सर्वावस्थस्य मम ईश्वरस्य वर्त्म मार्गम् अनुवर्त्तन्ते मनुष्याः।

यत्फलार्थितया यस्मिन्कर्मण्यधिकृताः ये प्रयतन्ते ते मनुष्या अत्रोच्यन्ते।

हे पार्थ सर्वशः सर्व-प्रकारैः।। ११ ।।

---

1 "तं यथा यथोपासते तं तमेव फलं लभते" इति श्रुतेः इत्यधिकं पाठः क्वचित्।

यदि तवेश्वरस्य रागादि-दोषाभावात् सर्व-प्राणिष्वनुजिघृक्षायां तुल्यायां सर्व-फल-प्रदान-समर्थे च त्वयि सति, “वासुदेवः सर्वम्” इति ज्ञानेनैव मुमुक्षवः सन्तः कस्मात् त्वामेव सर्वे न प्रतिपद्यन्त इति शृणु तत्र कारणम् -

**कांक्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः।**

**क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा।। १२।।**

इह कर्मणां सिद्धिं कांक्षन्तः देवताः यजन्ते। हि मानुषे लोके कर्मजा सिद्धिः क्षिप्रं भवति ।। १२

Desiring the result of actions here (in this world), they worship the gods. For, in the human world, result born of action comes very quickly.

कांक्षन्त इति। कांक्षन्तः अभीप्सन्तः कर्मणां सिद्धिं फल-निष्पत्तिं प्रार्थयन्तो यजन्त इह अस्मिँल्लोके देवताः इन्द्राग्न्याद्याः। “अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मि इति न स वेद यथा

पशुरेवं स देवानाम्" (बृ १.४.१०) इति श्रुतेः।

तेषां हि भिन्न-देवता-याजिनां फलाकांक्षिणां क्षिप्रं शीघ्रं हि यस्माद् मानुषे लोके।

मनुष्य-लोके हि शास्त्राधिकारः।

"क्षिप्रं हि मानुषे लोके" इति विशेषणादन्येष्वपि कर्म-फल-सिद्धिं दर्शयति भगवान्।

मानुषे लोके वर्णाश्रमादि-कर्माधिकार इति विशेषः[२]।

तेषां वर्णाश्रमाद्यधिकारि-कर्मणां फल-सिद्धिः क्षिप्रं भवति कर्मजा कर्मणो जाता।। १२ ।।

[2] वर्णाश्रमादि-कर्माणीति शेषः इति पाठान्तरम्।

मानुषे एव लोके वर्णाश्रमादिकर्माधिकारः न अन्येषु लोकेषु इति नियमः किं निमित्तः इति।

अथवा वर्णाश्रमादिप्रविभागोपेता मनुष्याः मम वर्त्म अनुवर्त्तन्ते सर्वशः इत्युक्तं कस्मात् पुनः

कारणात् नियमेन तव एव वर्त्म अनुवर्त्तन्ते नान्यस्य इति उच्यते -

**चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।**

**तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्।। १३ ।।**

मया चातुर्वर्ण्यं गुणकर्मविभागशः सृष्टम् । तस्य कर्तारम् अपि (सन्तं) मां अव्ययम् अकर्तारम् विद्धि ।। १३

The four-fold grouping (of people), a division based on duties and qualities, was created by Me. Even though I am its author, know Me to be a non-doer, ever changeless.

चातुर्वर्ण्यमिति। चातुर्वर्ण्यं चत्वार एव वर्णाश्चातुर्वर्ण्यं मया ईश्वरेण सृष्टम् उत्पादितं “ब्राह्मणोऽस्य

मुखमासीत्” (ऋ. १०.९०.१२) इत्यादि-श्रुतेः। गुणकर्मविभागशः गुण-विभागशः कर्म-

विभागशश्च। गुणाः सत्त्व-रजस्-तमांसि। तत्र सात्त्विकस्य सत्व-प्रधानस्य ब्राह्मणस्य "शमो दमः तपः" (गी १८.४२) इत्यादीनि कर्माणि। सत्त्वोपसर्जन-रजः-प्रधानस्य क्षत्रियस्य शौर्य-तेजः-प्रभृतीनि कर्माणि। तम-उपसर्जन-रजःप्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि। रज-उपसर्जन-तमःप्रधानस्य शूद्रस्य शुश्रूषैव कर्म इत्येवं गुण-कर्म-विभागशश्चातुर्वर्ण्यं मया सृष्टमित्यर्थः। तच्चेदं चातुर्वर्ण्यं नान्येषु लोकेष्वतो "मानुषे लोके इति" विशेषणम्। हन्त तर्हि चातुर्वर्ण्य-सर्गादेः कर्मणः कर्तृत्त्वात् तत्फलेषु युज्यसेऽतो न त्वं नित्य-मुक्तो नित्येश्वरश्चेति। उच्यते - यद्यपि माया-संव्यवहारेण तस्य कर्मणः कर्तारमपि सन्तं मां परमार्थतः विद्ध्यकर्तारम्। अत एव अव्ययम् असंसारिणं च मां विद्धि।। १३ ।।

येषां तु कर्मणां कर्त्तारं मां मन्यसे परमार्थतः तेषामकर्त्तैवाहम्। यतः -

**न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।**

**इति मां योऽभिजानाति कर्मभिर्न स बध्यते।। १४।।**

कर्माणि मां न लिम्पन्ति। कर्मफले मे न स्पृहा। इति यः मां अभिजानाति सः कर्मभिः न बध्यते।। १४

Actions do not affect Me. There is no longing with reference to the result of action for Me. The one who knows Me clearly in this way is not bound by actions.

न मामिति। न मां तानि कर्माणि लिम्पन्ति देहाद्यारम्भकत्वेन, अहङ्काराभावात्। न च तेषां कर्मणां फलेषु मे मम स्पृहा तृष्णा। येषां तु संसारिणामहं कर्त्तेत्यभिमानः कर्मसु, स्पृहा तत्फलेषु च, तान् कर्माणि लिम्पन्तीति युक्तम्। तदभावान्न मां कर्माणि लिम्पन्ति। इति एवं यः योऽन्योऽपि माम् आत्मत्वेन अभिजानाति "नाहं कर्त्ता, न मे कर्म-फले स्पृहा" इति सः कर्मभिः न बध्यते। तस्यापि न देहाद्यारम्भकाणि कर्माणि भवन्तीत्यर्थः।। १४ ।।

“नाहं कर्त्ता, न मे कर्म-फले स्पृहा” इति -

**एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः।**

**कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम्।। १५।।**

पूर्वैः मुमुक्षिभिः अपि एवं ज्ञात्वा कर्म कृतम्। तस्मात् पूर्वैः पूर्वतरं कृतं कर्म एव त्वं कुरु ।।

Knowing (Me) in this manner, even seekers of ancient times performed action. Therefore, indeed, perform action (just as it) was done by those who came before in the ancient past.

एवमिति। एवं ज्ञात्वा कृतं कर्म पूर्वैरपि अतिक्रान्तैः मुमुक्षुभिः। कुरु तेन कर्मैव त्वम्।

न तूष्णीमासनं, नापि संन्यासः कर्तव्यः।

तस्मात् त्वं पूर्वैरप्यनुष्ठितत्वाद् यद्यनात्मज्ञः त्वं तदाऽऽत्म-शुद्ध्यर्थम्, तत्वविच्चेल्लोक-सङ्ग्रहार्थम्।

पूर्वैः जनकादिभिः पूर्वतरं कृतं, न अधुनातनं कृतं निर्वर्त्तितम्।। १५ ।।

तत्र कर्म चेत् कर्त्तव्यं त्वद्वचनादेव करोम्यहं, किं विशेषितेन “पूर्वैः पूर्वतरं कृतम्” इति।

उच्यते - यस्मान्महद्वैषम्यं कर्मणि। कथम् -

**किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।**

**तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्।। १६।।**

अत्र किं कर्म किम् अकर्म इति कवयः अपि मोहिताः। तत् कर्म ते प्रवक्ष्यामि यद् ज्ञात्वा अशुभात् मोक्ष्यसे ।। १६

Even the seers (scholars) are confused with reference to what is action (and) what is actionlessness. I shall tell you about action, knowing which you will be released from what is inauspicious (*saṃsāra*).

किं कर्मेति। किं कर्म किं च अकर्मेति कवयः मेधाविनः अप्यत्र अस्मिन् कर्मादि-विषये मोहिताः

मोहं गताः। अतः ते तुभ्यम् अहं कर्म अकर्म च प्रवक्ष्यामि।

यज्ज्ञात्वा विदित्वा कर्मादि मोक्ष्यसेऽशुभात् संसारात्।। १६ ।।

न चैतत्त्वया मन्तव्यम् - "कर्म नाम देहादि-चेष्टा लोक-प्रसिद्धम्।

अकर्म नाम तदक्रिया तूष्णीमासनम्। किं तत्र बोद्धव्यम्" इति। कस्मात्। उच्यते -

**कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः।**

**अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः।। १७।।**

कर्मणः अपि बोद्धव्यम् (अस्ति)। विकर्मणः च बोद्धव्यम् (अस्ति)। अकर्मणः च बोद्धव्यम् (अस्ति) । हि कर्मणः गतिः गहना ।।

Action (enjoined by the scriptures) is also to be known. Forbidden action and actionlessness must also be known. (This is) because the nature of *karma* is difficult (to understand).

कर्मण इति। कर्मणः शास्त्र-विहितस्य हि यस्मात् अपि अस्ति बोद्धव्यम्।

बोद्धव्यं च अस्त्येव विकर्मणः प्रतिषिद्धस्य। तथा अकर्मणश्च तूष्णीं-भावस्य बोद्धव्यम् अस्तीति

त्रिष्वप्यध्याहारः कर्त्तव्यः। यस्माद् गहना विषमा दुर्ज्ञेया कर्मणः इत्युपलक्षणार्थं कर्मादीनां

कर्माकर्म-विकर्मणां गतिः याथात्म्यं तत्त्वमित्यर्थः।। १७ ।।

किं पुनस्तत्त्वं कर्मादेर्यद् “बोद्धव्यं वक्ष्यामि” इति प्रतिज्ञातम्। उच्यते -

**कर्मण्यकर्म यः पश्येद् अकर्मणि च कर्म यः।**

**स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत्।। १८**

यः (ज्ञानिनाम्) कर्मणि अकर्म पश्येद् यः (अज्ञानिनाम्) अकर्मणि च कर्म(बीजम्) (पश्येद्) सः मनुष्येषु बुद्धिमान् । सः युक्तः कृत्स्नकर्मकृत् (च भवति)।।

The one who sees actionlessness in action and action in actionlessness is wise among human beings. That person is a *yogī*, who has done everything that is to be done.

कर्मणि इति। कर्मणि क्रियत इति कर्म, व्यापारमात्रं, तस्मिन् कर्मणि अकर्म कर्माभावं यः पश्येद्, अकर्मणि च कर्माभावे कर्तृ-तन्त्रत्वात् प्रवृत्ति-निवृत्त्योः[3] वस्त्वप्राप्यैव[4] हि सर्व एव क्रिया-कारकादि-व्यवहारोऽविद्याभूमावेव कर्म यः पश्येत् पश्यति स बुद्धिमान् मनुष्येषु स युक्तः योगी कृत्स्नकर्मकृत् समस्त-कर्मकृच्च स इति स्तूयते कर्माकर्मणोः इतरेतर-दर्शी।

---

[3] प्रवृत्ति-निवृत्त्योः कर्तृ-तन्त्रत्वात् यत्कर्तृतन्त्रं तत्कर्मेति व्याप्त्या निवृत्तिरूपे कर्माभावे कर्मदर्शनं युक्तमिति भावः।

[4] निवृत्तिः वस्त्वधीना न भवति यतः वस्तु परमार्थतत्वमप्राप्यैव सर्वो व्यवहारोऽस्ति।

**आक्षेपः**

ननु किमिदं विरुद्धमुच्यते ‘‘कर्मण्यकर्म यः पश्येदकर्मणि च कर्म’’ इति।

न हि कर्माकर्म स्याद्, अकर्म वा कर्म। तत्र विरुद्धं कथं पश्येद् द्रष्टा।

**समाधानम्**

न। अकर्मैव परमार्थतः सत् कर्मवदवभासते मूढदृष्टेर्लोकस्य। तथा कर्मैव अकर्मवत्।

तत्र यथा-भूत-दर्शनार्थमाह भगवान् - ‘‘कर्मण्यकर्म यः पश्येत्’’ इत्यादि। अतो न विरुद्धम्।

बुद्धिमत्वाद्युपपत्तेश्च। ‘‘बोद्धव्यम्’’ इति च यथा-भूत-दर्शनमुच्यते।

न च विपरीत-ज्ञानादशुभाद् मोक्षणं स्याद् ‘‘यज्ज्ञात्वा मोक्ष्यसेऽशुभात्’’ (गी ४.१६) इति चोक्तम्। तस्मात् कर्माकर्मणी विपर्ययेण गृहीते प्राणिभिः। तद्विपर्यय-ग्रहण-निवृत्त्यर्थं भगवतो वचनं ‘‘कर्मण्यकर्म यः’’ इत्यादि। न चात्र कर्माधिकरणमकर्मास्ति ‘‘कुण्डे बदराणि’’ इव।

नापि अकर्माधिकरणं कर्मास्ति कर्माभावत्वादकर्मणः।

अतो विपरीत-गृहीते एव कर्माकर्मणी लौकिकैः, यथा मृगतृष्णिकायामुदकं, शुक्तिकायां वा

रजतम्।

**आक्षेपः**

ननु कर्म कर्मैव सर्वेषां, न क्वचिद् व्यभिचरति।

**समाधानम्**

तन्न। नौस्थस्य नावि गच्छन्त्यां तटस्थेष्वगतिषु नगेषु प्रतिकूल-गति-दर्शनात्।

दूरेषु चक्षुषाऽसन्निकृष्टेषु चैत्र-मैत्रादि-जन-सङ्घेषु गच्छत्सु गत्यभाव-दर्शनात्।

एवमिहाप्यकर्मणि "अहं करोमि" इति कर्म-दर्शनं, कर्मणि चाकर्मदर्शनं विपरीत-दर्शनं,

येन तन्निराकरणार्थमुच्यते ‘‘कर्मण्यकर्म यः पश्येत्’’ इत्यादि।

तदेतदुक्त-प्रतिवचनमप्यसकृदत्यन्त-विपरीत-दर्शन-भाविततया मोमुह्यमानो लोकः श्रुतम् अप्यसकृत् तत्त्वं विस्मृत्य विस्मृत्य मिथ्या-प्रसङ्गमवतार्यावतार्य चोदयतीति पुनः पुनरुत्तरमाह भगवान् दुर्विज्ञेयत्वं चालक्ष्य वस्तुनः।

‘‘अव्यक्तोऽयमचिन्त्योऽयम्’’ (गी २.२५), ‘‘न जायते म्रियते’’ (गी २.२०) इत्यादिनाऽऽत्मनि कर्माभावः, श्रुति-स्मृति-न्याय-प्रसिद्ध उक्तो वक्ष्यमाणश्च।

तस्मिन्नात्मनि कर्माभावेऽकर्मणि कर्म-विपरीत-दर्शनम् अत्यन्त-निरूढम्।

यतः ‘‘किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः’’ (गी ४.१६)।

देहाद्याश्रयं कर्मात्मन्यध्यारोप्य “अहं कर्त्ता, ममैतत्कर्म, मयास्य कर्मणः फलं भोक्तव्यम्” इति च, तथा “अहं तूष्णीं भवामि, येनाहं निरायासोऽकर्मा, सुखी स्याम्” इति कार्य-करणाश्रयं व्यापारोपरमं तत्कृतं च सुखित्वमात्मन्यध्यारोप्य “न करोमि किञ्चित्, तूष्णीं सुखमासम्” इत्यभिमन्यते लोकः।

तत्रेदं लोकस्य विपरीत-दर्शनापनयनायाह भगवान् “कर्मण्यकर्म यः पश्येत्” इत्यादि।

अत्र च कर्म कर्मैव सत् कार्य-करणाश्रयं कर्मरहितेऽविक्रिय आत्मनि सर्वैरध्यस्तं यतः पण्डितोऽपि “अहं करोमि” इति मन्यते। अत आत्म-समवेततया सर्व-लोक-प्रसिद्धे कर्मणि नदी-कूलस्थेष्विव वृक्षेषु गतिः प्रातिलोम्येन अकर्म कर्माभावं यथाभूतं गत्यभावमिव वृक्षेषु यः

पश्येद्, अकर्मणि च कार्य-करण-व्यापरोपरमे कर्मवदात्मनि अध्यारोपिते "तूष्णीमकुर्वन्

सुखमासे" इत्यहङ्काराभिसन्धि-हेतुत्वात् तस्मिन्नकर्मणि च कर्म यः पश्येत्।

य एवं कर्माकर्म-विभागज्ञः स बुद्धिमान् पण्डितः मनुष्येषु स युक्तः योगी कृत्स्नकर्मकृत् च।

सः अशुभाद् मोक्षितः कृत-कृत्यो भवतीत्यर्थः।

अयं श्लोकोऽन्यथा व्याख्यातः कैश्चित्।

कथम्? नित्यानां किल कर्मणाम् ईश्वरार्थे अनुष्ठीयमानानां तत्फलाभावाद् "अकर्माणि"

तान्युच्यन्ते गौण्या वृत्त्या। तेषां चाकरणम् अकर्म।

तच्च प्रत्यवाय-फलत्वात् "कर्म" उच्यते गौण्यैव वृत्त्या। तत्र नित्ये कर्मण्यकर्म यः पश्येत्

फलाभावाद् यथा “धेनुरपि गौः अगौः” इत्युच्यते, क्षीराख्यं फलं न प्रयच्छतीति तद्वत्।

तथा नित्याकरणे त्वकर्मणि कर्म यः पश्येन्नरकादि-प्रत्यवाय-फलं प्रयच्छतीति।

नैतद्युक्तं व्याख्यानम्।

एवं ज्ञानादशुभान्मोक्षानुपपत्तेः “यज्ज्ञात्वा मोक्ष्यसेऽशुभात्” (गी ४.१६) इति भगवतोक्तं वचनं

बाध्येत। कथम्? नित्यानामनुष्ठानादशुभात् स्यान्नाम मोक्षणम्। न तु तेषां फलाभाव-ज्ञानात्।

न हि नित्यानां फलाभाव-ज्ञानमशुभ-मुक्ति-फलत्वेन चोदितं नित्य-कर्म-ज्ञानं वा।

न च भगवतैवेहोक्तम्। एतेनाकर्मणि कर्मदर्शनं प्रत्युक्तम्।

न ह्यकर्मणि कर्मेति दर्शनं कर्त्तव्यतयेह चोद्यते, नित्यस्य तु कर्त्तव्यता-मात्रम्।

न चाकरणान्नित्यस्य प्रत्यवायो भवतीति विज्ञानात् किञ्चित्फलं स्यात्।

नापि नित्याकरणं ज्ञेयत्वेन चोदितम्। नापि कर्माकर्मेति मिथ्या-दर्शनाद् अशुभान्मोक्षणं बुद्धिमत्त्वं

युक्तता, कृत्स्न-कर्म-कृत्त्वादि च फलमुपपद्यते, स्तुतिर्वा। मिथ्या-ज्ञानमेव हि साक्षादशुभ-रूपम्।

कुतोऽन्यस्मादशुभाद् मोक्षणम्। न हि तमस्तमसो निवर्त्तकं भवति।

**आक्षेपः**

ननु कर्मणि यदकर्मदर्शनम्, अकर्मणि वा कर्मदर्शनं न तन्मिथ्याज्ञानं, किं तर्हि गौणं

फलभावाभाव-निमित्तम्।

**समाधानम्**

न। कर्माकर्म-विज्ञानादापि गौणात्फलस्याश्रवणात्। नापि श्रुतहान्यश्रुत-परिकल्पनया कश्चिद्विशेषो लभ्यते। स्व-शब्देनापि शक्यं वक्तुं नित्य-कर्मणां फलं नास्ति, अकरणाच्च तेषां नरक-पातः स्यादिति। तत्र व्याजेन पर-व्यामोह-रूपेण ''कर्मण्यकर्म यः पश्येत्'' इत्यादिना किम्? तत्रैवं व्याचक्षाणेन भगवतोक्तं वाक्यं लोक-व्यामोहार्थमिति व्यक्तं कल्पितं स्यात्। न चैतच्छद्म-रूपेण वाक्येन रक्षणीयं वस्तु, नापि शब्दान्तरेण पुनः पुनरुच्यमानं सुबोधं स्यादित्येवं वक्तुं युक्तम्। ''कर्मण्येवाधिकारस्ते'' (गी २.४७) इत्यत्र हि स्फुटतर उक्तोऽर्थो न पुनर्वक्तव्यो भवति।

सर्वत्र च प्रशस्तं बोद्धव्यं कर्त्तव्यमेव। न निष्प्रयोजनं बोद्धव्यमित्युच्यते।

न च मिथ्याज्ञानं बोद्धव्यं भवति, तत्प्रत्युपस्थापितं च अवस्थाभासम्[5]।

नापि नित्यानामकरणादभावात् प्रत्यवाय-भावोत्पत्तिः “नासतो विद्यते भावः” (गी २.१६) इति

वचनात्। “कथमसतः सज्जायेत” (छा ६.२.२) इति च दर्शितम्। असतः सज्जन्मप्रतिषेधात्।

असतः सदुत्पत्तिं ब्रुवता असदेव सद्भवेत्, सच्चासद्भवेद् इत्युक्तं स्यात्।

तच्चाप्ययुक्तं सर्व-प्रमाण-विरोधात्।

[5] तत्प्रत्युपस्थापितं वा वस्त्वाभासम् इति पाठान्तरम्। मिथ्याज्ञानविषयो हि मिथ्यावस्त्वेवेति कथं तस्य वस्त्वाभासस्य बोद्धव्यम्।

न च निष्फलं विदध्यात् कर्मशास्त्रं दुःख-रूपत्वाद्, दुःखस्य च बुद्धि-पूर्वकतया कार्यत्वानुपपत्तेः।

तदकरणे च नरक-पाताभ्युप-गमे अनर्थायैवोभयथापि करणेऽकरणे च शास्त्रं निष्फलं कल्पितं स्यात्।

स्वाभ्युपगम-विरोधश्च नित्यं निष्फलं कर्मेत्यभ्युपगम्य मोक्ष-फलायेति ब्रुवतः।

तस्माद्यथा-श्रुत एवार्थः "कर्मण्यकर्म यः" इत्यादेः। तथा च व्याख्यातोऽस्माभिः श्लोकः।। १८ ।।

तदेतत्कर्मण्यकर्मादि यथोक्त-दर्शित्वं[६] स्तूयते -

**यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः।**

**ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः।। १९।।**

यस्य सर्वे समारम्भाः कामससङ्कल्पर्जिताः तम् ज्ञानाग्निदग्धकर्माणं बुधाः पण्डितम् आहुः ।।
The one for whom all undertakings are free from desire (for results) and will, whose actions are burned up by the fire of knowledge, the sages call that person wise.

यस्येति। यस्य यथोक्त-दर्शिनः सर्वे यावन्तः समारम्भाः सर्वाणि कर्माणि समारभ्यन्त इति समारम्भाः कामसङ्कल्पवर्जिताः कामैस्तत्कारणैश्च सङ्कल्पैर्वर्जिता मुधैव चेष्टा-मात्रा अनुष्ठीयन्ते, प्रवृत्तेन चेल्लोक-सङ्ग्रहार्थं, निवृत्तेन चेज्जीवन-मात्रार्थम्।

तं ज्ञानाग्नि-दग्धकर्माणं कर्मादावकर्मादिदर्शनं ज्ञानं तदेवाग्निस्तेन ज्ञानाग्निना दग्धानि शुभाशुभ-लक्षणानि कर्माणि यस्य तमाहुः परमार्थतः पण्डितं बुधाः ब्रह्मविदः।। १९ ।।

---

6 तदेतत्कर्मण्यकर्मादिदर्शनमिति पाठान्तरम्।

यस्त्वकर्मादि-दर्शी सोऽकर्मादि-दर्शनादेव निष्कर्मी[7] संन्यासी जीवन-मात्रार्थ-चेष्टः सन् कर्मणि न प्रवर्त्तते यद्यपि प्राग्विवेकतः प्रवृत्तः।

यस्तु प्रारब्ध-कर्मा सन्नुत्तरकालम्[8] उत्पन्नात्म-सम्यग्दर्शनः स्यात् स कर्मणि प्रयोजनमपश्यन् ससाधनं कर्म परित्यजत्येव।

स कुतश्चिन्निमित्तात् कर्म-परित्यागासम्भवे सति कर्मणि तत्फले च सङ्ग-रहिततया स्व-प्रयोजनाभावाल्लोक-संग्रहार्थं पूर्ववत् कर्मणि प्रवृत्तोऽपि नैव किञ्चित् करोति ज्ञानाग्नि-दग्ध-कर्मत्वात्।

---

[7] निष्कर्मा इति वा।

[8] यज्ञादिकर्म प्रारभ्य तस्मिन् कर्मण्यसमाप्ते एव प्रारम्भोत्तरकालमात्मज्ञानी भवेत् सः।

तदीयं कर्माकर्मैव संपद्यते इत्येतदर्थं दर्शयिष्यन्नाह -

**त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।**

**कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः।। २०।।**

कर्मफलासङ्गं त्यक्त्वा नित्यतृ’’ाः निराश्रयः सन् सः कर्मणि अभिप्रवृत्तः अपि किञ्चित् न एव करोति ।। २०

Giving up the deep attachment to the results of action, always contented, being not dependent on anything, he (or she) does not do anything even though fully engaged in action.

त्यक्त्वेति। त्यक्त्वा कर्मसु अभिमानं फलासङ्गं च, यथोक्तेन ज्ञानेन नित्यतृप्तो निराकाङ्क्षो विषयेष्वित्यर्थः। निराश्रयः आश्रयरहितः। आश्रयो नाम यदाश्रित्य पुरुषार्थं सिसाधयिषति। दृष्टादृष्टेष्ट-फल-साधनाश्रय-रहित इत्यर्थः।

विदुषा क्रियमाणं कर्म परमार्थतः अकर्मैव तस्य निष्क्रियात्म-दर्शन-संपन्नत्वात्।

तेनैवंभूतेन स्व-प्रयोजनाभावात् ससाधनं कर्म परित्यक्तव्यमेवेति प्राप्ते, ततो निर्गमासम्भवाल्लोक-सङ्ग्रह-चिकीर्षया शिष्ट-विगर्हणापरिजिहीर्षया[९] वा पूर्ववत् कर्मण्यभिप्रवृत्तोऽपि निष्क्रियात्म-दर्शन-संपन्नत्वात् नैव किञ्चित् करोति सः।। २० ।।

[9] विगर्हणं निन्दा, असमाप्यैव संन्यस्तवानिति। परिहर्त्तुमिच्छा परिजिहीर्षा।

यः पुनः पूर्वोक्त-विपरीतः प्रागेव कर्मारम्भात् ब्रह्मणि सर्वान्तरे प्रत्यगात्मनि निष्क्रिये सञ्जातात्म-दर्शनः स दृष्टादृष्टेष्ट-विषयाशीर्विवर्जिततया दृष्टादृष्टार्थे कर्मणि प्रयोजनम् अपश्यन् ससाधनं कर्म संन्यस्य शरीर-यात्रा-मात्र-चेष्टो यतिर्ज्ञान-निष्ठो मुच्यते इत्येतमर्थं दर्शयितुमाह -

**निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः।**

**शारीरं केवलं कर्म कुर्वन् नाप्नोति किल्बिषम्।। २१।।**

निराशीः यतचित्तात्मा त्यक्तसर्वपरिग्रहः केवलं शारीरं कर्म कुर्वन् किल्बिषं न आप्नोति ।। २१

The person who is free of expectations, whose body, mind, and senses have been mastered, who has given up all possessions, doing only action that sustains the body, does not incur sin.

निराशीरिति। निराशीः निर्गता आशिषो यस्मात् स निराशीः यतचित्तात्मा चित्तम् अन्तःकरणम्, आत्मा बाह्य-कार्य-करण-संघातः, तावुभावपि यतौ संयतौ येन स यत-चित्तात्मा त्यक्तसर्वपरिग्रहः

त्यक्तः सर्वः परिग्रहो येन स त्यक्त-सर्व-परिग्रहः शारीरं शरीर-स्थिति-मात्र-प्रयोजनं केवलं तत्राप्यभिमान-वर्जितं कर्म कुर्वन् नाप्नोति न प्राप्नोति किल्बिषम् अनिष्टरूपं पापं धर्मञ्च। धर्मोऽपि मुमुक्षोः अनिष्ट-रूपत्वात् किल्बिषमेव बन्धापादकत्वात्। तस्मात् ताभ्यां मुक्तो भवति। संसार-मुक्तो भवतीत्यर्थः[१०] ।।

किञ्च शारीरं केवलं कर्मेत्यत्र किं शरीर-निर्वर्त्यं शारीरं कर्माभिप्रेतम् आहोस्वित् शरीर-स्थिति-मात्र-प्रयोजनं शारीरं कर्मेति। किंचातः यदि शरीर-निर्वर्त्यं शारीरं कर्म यदि वा शरीर-स्थिति-मात्र-प्रयोजनं शारीरमिति? उच्यते।

---

[10] तस्मात् ताभ्यां मुक्तो भवति। संसार-मुक्तो भवतीत्यर्थः - इत्येतत् क्वचिन्न दृश्यते।

यदा शरीर-निर्वर्त्यं कर्म शारीरमभिप्रेतं स्यात् तदा दृष्टादृष्ट-प्रयोजनं कर्म प्रतिषिद्धमपि शरीरेण कुर्वन्नाप्नोति किल्बिषमिति ब्रुवतः विरुद्धाभिधानं प्रसज्येत।

शास्त्रीयं च कर्म दृष्टादृष्ट-प्रयोजनं शरीरेण कुर्वन्नाप्नोति किल्बिषमित्यपि ब्रुवतोऽप्रा''ा-प्रतिषेध-प्रसङ्गः। शारीरं कर्म कुर्वन्निति विशेषणात् केवल-शब्द-प्रयोगाच्च वाङ्-मनस-निर्वर्त्यं कर्म विधि-प्रतिषेध-विषयं धर्माधर्म-शब्द-वाच्यं कुर्वन् प्राप्नोति किल्बिषमित्युक्तं स्यात्।

तत्रापि वाङ्-मनसाभ्यां विहितानुष्ठान-पक्षे किल्बिष-प्रा''ा-वचनं विरुद्धमापद्येत।

प्रतिषिद्ध-सेवा-पक्षेऽपि भूतार्थानुवाद-मात्रमनर्थकं स्यात्।

यदा तु शरीर-स्थिति-मात्र-प्रयोजनं शारीरं कर्माभिप्रेतं भवेत् तदा दृष्टादृष्ट-प्रयोजनं कर्म विधि-प्रतिषेध-शास्त्र-गम्यं शरीर-वाङ्-मनस-निर्वर्त्यम् अन्यदकुर्वन् तैरेव शरीरादिभिः शरीर-स्थिति-मात्र-प्रयोजनं केवल-शब्द-प्रयोगाद्, "अहं करोमि" इत्यभिमान-वर्जितः शरीरादि-चेष्टा-मात्रं लोक-दृष्ट्या कुर्वन् नाप्नोति किल्बिषम्।

एवं-भूतस्य पाप-शब्द-वाच्य-किल्बिष-प्रा''यसम्भवात् किल्बिषं संसारं नाप्नोति ज्ञानाग्नि-दग्ध-सर्व-कर्मत्वाद् अप्रतिबन्धेन मुच्यत एवेति पूर्वोक्त-सम्यग्दर्शन-फलानुवादः एवैषः।

एवं शारीरं केवलं कर्म इत्यस्यार्थस्य परिग्रहे निरवद्यं भवति।। २१ ।।

त्यक्त-सर्व-परिग्रहस्य यतेरन्नादेः शरीर-स्थिति-हेतोः परिग्रहस्याभावाद् याचनादिना शरीर-स्थितौ

कर्त्तव्यतायां प्रा’’ाायाम् “अयाचितमसंक्ल’’ामुपपन्नं यदृच्छया” (बो.ध.सू २.८.१२) इत्यादिना

वचनेनानुज्ञातं यतेः शरीर-स्थिति-हेतोरन्नादेः प्रा’’ा-द्वारमाविष्कुर्वन्नाह -

**यदृच्छालाभसन्तुष्टः द्वन्द्वातीतो विमत्सरः।**

**समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते।। २२**

यदृच्छालाभसन्तुष्टः द्वन्द्वातीतो विमत्सरः सिद्धौ असिद्धौ च समः कृत्वापि न निबध्यते।। २२

The one who is happy with whatever comes by chance, who is unaffected by the opposites, free from jealousy, and even-minded with reference to success and failure, is not bound even though performing action.

यदृच्छेति। यदृच्छालाभसन्तुष्टः अप्रार्थितोपनतो लाभो यदृच्छा-लाभः तेन सन्तुष्टः सञ्जातालं-प्रत्ययः

द्वन्द्वातीतः द्वन्द्वैः शीतोष्णादिभिः हन्यमानोऽप्यविषण्ण-चित्तो द्वन्द्वातीत उच्यते।

विमत्सरः विगत-मत्सरो निर्वैर-बुद्धिः समः तुल्यः यदृच्छालाभस्य सिद्धावसिद्धौ च।

य एवंभूतो यतिरन्नादेः शरीर-स्थिति-हेतोः लाभालाभयोः समो हर्ष-विषाद-वर्जितः कर्मादावकर्मादि-दर्शी यथाभूतात्म-दर्शन-निष्ठः सन् शरीर-स्थिति-मात्र-प्रयोजने भिक्षाटनादि-कर्मणि शरीरादि-निर्वर्त्ये "नैव किञ्चित् करोम्यहम्" (गी ५.८) "गुणा गुणेषु वर्तन्ते" (गी ३.२८) इत्येवं सदा सम्परिचक्षाण आत्मनः कर्त्तृत्वाभावं पश्यन् नैव किञ्चिद् भिक्षाटनादिकं कर्म करोति।

लोक-व्यवहार-सामान्य-दर्शनेन तु लौकिकारोपित-कर्तृत्वे भिक्षाटनादौ कर्मणि कर्त्ता भवति।

स्वानुभवेन तु शास्त्र-प्रमाणादि-जनितेन अकर्त्तैव।

स एवं पराध्यारोपित-कर्त्तृत्वं शरीर-स्थिति-मात्र-प्रयोजनं भिक्षाटनादिकं कर्म कृत्वापि न निबध्यते बन्ध-हेतोः कर्मणः सहेतुकस्य ज्ञानाग्निना दग्धत्वाद् इत्युक्तत्वाद् अनुवाद एव एषः।। २२ ।।

“त्यक्त्वा कर्म-फलासङ्गम्” (गी ४.२०) इत्यनेन श्लोकेन यः प्रारब्ध-कर्मा सन् यदा निष्क्रिय-

ब्रह्मात्म-दर्शन-संपन्नः स्यात् तदा तस्यात्मनः कर्तृ-कर्म-प्रयोजनाभाव-दर्शिनः कर्म-परित्यागे प्रा”ै

कुतश्चित् निमित्तात् तदसम्भवे सति पूर्ववत् तस्मिन् कर्मणि अभि-प्रवृत्तोपि “नैव किञ्चित् करोति

सः” (गी ४.२०) इति कर्माभावः प्रदर्शितः। यस्यैवं कर्माभावो दर्शितः तस्यैव -

**गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः।**

**यज्ञायाचरतः कर्म समग्रं प्रविलीयते।। २३ ।।**

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः यज्ञाय आचरतः समग्रं कर्म प्रविलीयते।।

The *karma* of one who is free from attachment, who is liberated, whose mind is rooted in self-knowledge, who performs for the sake of daily *yajña*, resolves totally.

गतसङ्गस्येति। गतसङ्गस्य सर्वतो निवृत्तासक्तेः मुक्तस्य निवृत्त-धर्माधर्मादि-बन्धनस्य ज्ञानावस्थितचेतसः ज्ञान एवावस्थितं चेतो यस्य सोऽयं ज्ञानावस्थित-चेताः तस्य यज्ञाय यज्ञ-निर्वृत्त्यर्थम् आचरतः निर्वर्त्तयतः कर्म समग्रं सहाग्रेण फलेन वर्त्तत इति समग्रं कर्म तत्समग्रं प्रविलीयते विनश्यतीत्यर्थः।। २३ ।।

कस्मात्पुनः कारणात् क्रियमाणं कर्म स्वकार्यारम्भमकुर्वत् समग्रं प्रविलीयते इत्युच्यते।  यतः -

**ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ ब्रह्मणा हुतम्।**

**ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना।। २४।।**

अर्पणं ब्रह्म हविः ब्रह्म ब्रह्माग्नौ ब्रह्मणा हुतम् (ब्रह्म)। ब्रह्मकर्मसमाधिना तेन गन्तव्यं ब्रह्मैव (अर्पणं ब्रह्म... ब्रह्मकर्मसमाधेः एवं भाति इत्यर्थः)।। २४

The means of offering is *Brahman*. The oblation is *Brahman*, offered by *Brahman* into the fire, which is *Brahman*. *Brahman* indeed is to be reached by him who sees everything as *Brahman*.

ब्रह्मेति। ब्रह्मार्पणं येन करणेन ब्रह्मविद् हविरग्नावर्पयति तद् ब्रह्मैवेति पश्यति।

तस्यात्म-व्यतिरेकेणाभावं पश्यति।

यथा शुक्तिकायां रजताभावं पश्यति तथोच्यते ब्रह्मैव अर्पणमिति।

यथा यद्रजतं तच्छुक्तिकैवेति। “ब्रह्म, अर्पणम्” इति असमस्तपदे।

यदर्पण-बुद्ध्या गृह्यते लोके तदस्य ब्रह्मविदो ब्रह्मैव इत्यर्थः।

ब्रह्म हविः तथा यद्धविर्बुद्ध्या गृह्यमाणं तद् ब्रह्मैवास्य। तथा ब्रह्माग्नौ इति समस्तं पदम्।

अग्निरपि ब्रह्मैव यत्र हूयते। ब्रह्मणा कर्त्रा, ब्रह्मैव कर्ता इत्यर्थः। यत्तेन हुतं हवन-क्रिया तद् ब्रह्मैव।

यत्तेन गन्तव्यं फलं तदपि ब्रह्मैव। ब्रह्मकर्मसमाधिना ब्रह्मैव कर्म ब्रह्मकर्म तस्मिन् समाधिर्यस्य स

ब्रह्म-कर्म-समाधिः तेन ब्रह्म-कर्म-समाधिना ब्रह्मैव गन्तव्यम्।

एवं लोक-सङ्ग्रहं चिकीर्षुणापि क्रियमाणं कर्म परमार्थतोऽकर्म ब्रह्म-बुद्ध्युप-मृदितत्वात्।

एवं सति निवृत्त-कर्मणोऽपि सर्व-कर्म-संन्यासिनः सम्यग्दर्शन-स्तुत्यर्थं सन्यग्ज्ञान-रूपे अध्यात्म-यज्ञे यज्ञत्व-सम्पादनं ज्ञानस्य सुतरामुपपद्यते यद् अर्पणाद्यधि-यज्ञे प्रसिद्धं तदस्याध्यात्मं ब्रह्मैव परमार्थ-दर्शिन इति। अन्यथा सर्वस्य ब्रह्मत्वे अर्पणादीनामेव विशेषतो ब्रह्मत्वाभिधानमनर्थकं स्यात्। तस्माद् ''ब्रह्मैव इदं सर्वम्'' इत्यभिजानतो विदुषः सर्व-कर्माभावः।

कारक-बुद्ध्यभावाच्च। न हि कारक-बुद्धि-रहितं यज्ञाख्यं कर्म दृष्टम्। सर्वमेव अग्निहोत्रादिकं कर्म शब्द-समर्पित-देवता-विशेष-संप्रदानादि-कारक-बुद्धिमत् कर्त्रभिमान-फलाभिसन्धिमच्च दृष्टम्, नोपमृदित-क्रिया-कारक-फल-भेद-बुद्धिमत् कर्त्तृत्वाभिमान-फलाभिसन्धि-रहितं वा।

इदं तु ब्रह्म-बुद्ध्युपमृदितार्पणादि-कारक-क्रिया-फल-भेद-बुद्धि कर्म। अतोऽकर्मैव तत्।

तथा च दर्शितं "कर्मण्यकर्म यः पश्येत्" (गी ४.१८) "कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः" (गी ४.२०) "गुणा गुणेषु वर्त्तन्ते" (गी ३.२८) "नैव किञ्चित् करोमीति युक्तो मन्येत तत्ववित्" (गी ५.१८) इत्यादिभिः। तथा च दर्शयन् तत्र तत्र क्रिया-कारक-फल-भेद-बुद्ध्युपमर्दनं[११] करोति। दृष्टा च काम्याग्नि-होत्रादौ कामोपमर्देन काम्याग्निहोत्रादि-हानिः।

तथा मति-पूर्वकामति-पूर्वकादीनां कर्मणां कार्य-विशेषस्यारम्भकत्वं दृष्टम्।

---

[11] उपमर्दमिति वा।

तथेहापि ब्रह्म-बुद्ध्युपमृदितार्पणादि-कारक-क्रिया-फल-भेद-बुद्धेर्बाह्य-चेष्टा-मात्रेण कर्मापि विदुषोऽकर्म सम्पद्यते। अत उक्तं “समग्रं प्रविलीयते” (गी ४.२३) इति।

अत्र केचिदाहुः - यद् ब्रह्म तदर्पणादीनि। ब्रह्मैव किलार्पणादिना पञ्च-विधेन कारकात्मना व्यवस्थितं सत्तदेव कर्म करोति। तत्र नार्पणादि-बुद्धिर्निवर्त्यते किन्त्वर्पणादिषु ब्रह्म-बुद्धिराधीयते। यथा प्रतिमादौ विष्ण्वादि-बुद्धिः, यथा वा नामादौ ब्रह्म-बुद्धिः - इति।

सत्यम्। एवमपि स्याद्यदि ज्ञान-यज्ञ-स्तुत्यर्थं प्रकरणं न स्यात्।

अत्र तु सम्यग्दर्शनं  ज्ञान-यज्ञ-शब्दितम् अनेकान् यज्ञ-शब्दितान् क्रिया-विशेषान् उपन्यस्य

“श्रेयान्द्रव्यमयाद् यज्ञाद् ज्ञानयज्ञः “ (गी ४.३३) इति ज्ञानं स्तौति। अत्र च समर्थमिदं वचनं

“ब्रह्मार्पणम्” इत्यादि ज्ञानस्य यज्ञत्व-संपादने, अन्यथा सर्वस्य ब्रह्मत्वेऽर्पणादीनामेव विशेषतः

ब्रह्मत्वाभिधानमनर्थकं स्यात्।

ये त्वर्पणादिषु - प्रतिमायां विष्णु-दृष्टिवद् - ब्रह्म-दृष्टिः क्षिप्यते - नामादिष्विव च - इति ब्रुवते न

तेषां ब्रह्मविद्योक्तेह विवक्षिता स्यात्, अर्पणादि-विषयत्वाद् ज्ञानस्य।

न च दृष्टि-संपादन-ज्ञानेन मोक्ष-फलं प्राप्यते। “ब्रह्मैव तेन गन्तव्यम्” इति चोच्यते।

विरुद्धं च सम्यग्दर्शनमन्तरेण मोक्ष-फलं प्राप्यते इति। प्रकृत-विरोधश्च।

सम्यग्दर्शनं च प्रकृतं ‘‘कर्मण्यकर्म यः पश्येत्’’ (गी ४.१८) इत्यत्र।

अन्ते च सम्यग्दर्शनं तस्यैवोपसंहारात्। ‘‘श्रेयान् द्रव्यमात् यज्ञात् ज्ञानयज्ञः’’ (गी ४.३३) ‘‘ज्ञानं लब्ध्वा परां शान्तिम्’’ (गी ४.३९) इत्यादिना सम्यग्दर्शन-स्तुतिमेव कुर्वन्नुपक्षीणोऽध्यायः।

तत्राकस्मादर्पणादौ ब्रह्म-दृष्टिरप्रकरणे - प्रतिमायामिव विष्णु-दृष्टिः उच्यते - इत्यनुपपन्नम्।

तस्मात् यथाव्याख्यातार्थ एवायं श्लोकः।। २४ ।।

तत्राधुना सम्यग्दर्शनस्य यज्ञत्वं संपाद्य तत्स्तुत्यर्थमन्येऽपि यज्ञा उपक्षिप्यन्ते -

**दैवमेवापरे यज्ञं योगिनः पर्युपासते ।**

**ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ।। २५ ।।**

अपरे योगिनः दैवम् एव यज्ञं पर्युपासते। अपरे ब्रह्माग्नौ एव यज्ञेन यज्ञं उपजुह्वति ।। २५ ।।

*Karma-yogīs* perform only those rituals that invoke the deities, while others (*sannyāsīs*) offer themselves by themselves unto the fire (knowledge) of *Brahman*.

दैवमेवेति। दैवमेव देवा इज्यन्ते येन यज्ञेनासौ दैवो यज्ञः। तमेव अपरे यज्ञं योगिनः कर्मिणः पर्युपासते कुर्वन्तीत्यर्थः। ब्रह्माग्नौ "सत्यं ज्ञानमनन्तं ब्रह्म" (तै. २.१) "विज्ञानमानन्दं ब्रह्म" (बृ. ३.९.२८) "यत्साक्षादपरोक्षाद् ब्रह्म" (बृ. ३.२.१) "य आत्मा सर्वान्तरः" (बृ. ३.२.१) इत्यादि-वचनोक्तम् अशनायादि-सर्व-संसार-धर्म-वर्जितं "नेति नेति" (बृ. ४.४.२२) इति निरस्ताशेष-विशेषं ब्रह्म-शब्देनोच्यते।

ब्रह्म च तदग्निश्च स होमाधिकरणत्व-विवक्षया ब्रह्माग्निस्तस्मिन्ब्रह्माग्नौ।

अपरे अन्ये ब्रह्मविदो यज्ञं यज्ञ-शब्द-वाच्य आत्मा, आत्म-नामसु यज्ञ-शब्दस्य पाठात्।

तमात्मानं यज्ञं परमार्थतः परमेव ब्रह्म सन्तं बुद्ध्याद्युपाधि-संयुक्तमध्यस्त-सर्वोपाधि-धर्मकम्

आहुति-रूपं यज्ञेनैव आत्मनैवोक्तलक्षणेन उपजुह्वति प्रक्षिपन्ति।

सोपाधिकस्यात्मनो निरुपाधिकेन पर-ब्रह्म-स्वरूपेणैव यद्दर्शनं स तस्मिन्होमस्तं कुर्वन्ति

ब्रह्मात्मैकत्व-दर्शन-निष्ठाः संन्यासिन इत्यर्थः। सोऽयं सम्यग्दर्शन-लक्षणो यज्ञो दैव-यज्ञादिषु

यज्ञेषूपक्षिप्यते "ब्रह्मार्पणम्" (गी ४.२४) इत्यादि-श्लोकैः प्रस्तुतः "श्रेयान्द्रव्य-मयाद्यज्ञाज्ज्ञान-

यज्ञः परन्तप" (गी ४.३३) इत्यादिना स्तुत्यर्थम्।। २५ ।।

**श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।**

**शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति।। २६ ।।**

अन्ये श्रोत्रादीनि इन्द्रियाणि संयमाग्निषु जुह्वति। अन्ये शब्दादीन् विषयान् इन्द्रियाग्निषु जुह्वति ।। २६ ।।

Others offer (their) organs of hearing and other senses into the fire of self-mastery, (while still) others offer sound and other sense objects into the fire of the senses.

श्रोत्रादीनीति। श्रोत्रादीनीन्द्रियाणि अन्ये योगिनः संयमाग्निषु — प्रतीन्द्रियं संयमो भिद्यते इति बहु-वचनम् — संयमा एवाग्नयस्तेषु जुह्वति इन्द्रिय-संयममेव कुर्वन्तीत्यर्थः।

शब्दादीन् विषयानन्य इन्द्रियाग्निषु इन्द्रियाण्येवाग्नयः तेष्विन्द्रियाग्निषु जुह्वति श्रोत्रादिभिरविरुद्ध-विषय-ग्रहणं होमं मन्यन्ते।। २६ ।।

किञ्च -

**सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।**

**आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते।। २७ ।।**

अपरे सर्वाणि इन्द्रियकर्माणि प्राणकर्माणि च ज्ञानदीपिते आत्मसंयमयोगाग्नौ जुह्वति ।

Others offer all the activities of the senses and the organs of action unto the fire of self-mastery lighted by knowledge.

सर्वाणीति। सर्वाणि इन्द्रियकर्माणि इन्द्रियाणां कर्माणीन्द्रियकर्माणि तथा प्राणकर्माणि प्राणो वायुराध्यात्मिकः[१२] तत्कर्माण्याकुञ्चन-प्रसारणादीनि तानि चापरे आत्मसंयम-योगाग्नौ आत्मनि संयम आत्म-संयमः स एव योगाग्निः तस्मिन्नात्म-संयम-योगाग्नौ जुह्वति प्रक्षिपन्ति ज्ञानदीपिते स्नेहेनेव प्रदीपिते[१३] विवेक-विज्ञानेनोज्ज्वल-भावमापादिते प्रविलापयन्ति इत्यर्थः।। २७ ।।

12 आत्मन्यध्यात्मं तत्र भवःआध्यात्मिकः।

13 प्रदीपे इति वा।

**द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे।**

**स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः।। २८ ।।**

तथा संशितव्रताः अपरे यतयः द्रव्ययज्ञास्तपोयज्ञा योगयज्ञाः स्वाध्यायज्ञानयज्ञाश्च (भवन्ति)।। २८

So too, there are those who distribute wealth, those who follow prayerful disciplines, those who practise *yoga*, and those of firm vows and efforts who pursue knowledge.

द्रव्येति। द्रव्ययज्ञाः तीर्थेषु द्रव्य-विनियोगं यज्ञ-बुद्ध्या कुर्वन्ति ये ते द्रव्ययज्ञाः। तपोयज्ञा तपः यज्ञो येषां तपस्विनां ते तपोयज्ञाः[१४]। योगयज्ञाः प्राणायाम-प्रत्याहारादि-लक्षणो योगो यज्ञो येषां ते योग-यज्ञाः तथाऽपरे स्वाध्यायज्ञानयज्ञाश्च स्वाध्यायो यथा-विधि ऋगाद्यभ्यासो यज्ञो येषां ते स्वाध्याय-यज्ञाः। ज्ञान-यज्ञाः ज्ञानं शास्त्रार्थ-परिज्ञानं यज्ञो येषां ते ज्ञान-यज्ञाश्च यतयः यतन-शीलाः संशितव्रताः सम्यक्शितानि तनूकृतानि तीक्ष्णी- कृतानि व्रतानि येषां ते संशित-व्रताः।। २८ ।।

---

[14] ये तपस्विनस्ते तपोयज्ञाः इति पाठान्तरम्।

किञ्च -

**अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे ।**

**प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ।। २९ ।।**

(केचित्) अपाने प्राणं जुह्वति। तथाऽपरे प्राणेऽपानं (जुह्वति)। (अन्ये) प्राणापानगती रुद्ध्वा प्राणायामपरायणाः (भवन्ति)।। २९ ।।

So too, others, those who are committed to the practice of *prāṇāyāma* (breath control), stopping the flow of inhalation and exhalation, offer the outgoing breath into the incoming breath (and) the incoming breath into the outgoing breath.

अपान इति। अपाने अपान-वृत्तौ जुह्वति प्रक्षिपन्ति प्राणं प्राण-वृत्तिं, पूरकाख्यं प्राणायामं कुर्वन्तीत्यर्थः। प्राणेऽपानं तथाऽपरे जुह्वति, रेचकाख्यं च प्राणायामं कुर्वन्तीत्येतत्। प्राणापानगती मुख-नासिकाभ्यां वायोर्निर्गमनं प्राणस्य गतिः, तद्विपर्ययेणाधो-गमनम् अपानस्य, ते प्राणापान-गती एते रुद्ध्वा निरुध्य प्राणायामपरायणाः प्राणायाम-तत्पराः, कुम्भकाख्यं प्राणायामं कुर्वन्तीत्यर्थः[१५]।। २९ ।।

[15] पूर्वं योगयज्ञ इति अष्टाङ्गयुक्तो योगः उक्तः। अत्र पूरकादीनां प्रत्येकं यज्ञत्वमिति विशेषः।

किञ्च -

**अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।**

**सर्वेप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ।। ३० ।।**

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति । एते सर्वे अपि यज्ञविदो यज्ञक्षपितकल्मषाः ।। ३० ।।

Others, who regulate their food intake, offer their desire to eat (more) unto the digestive fires. All these (people) who observe religious disciplines (become), without exception, those for whom the impurities of the mind have been destroyed by the *yajña*.

अपर इति। अपरे नियताहाराः नियतः परिमित आहारो येषां ते नियताहाराः सन्तः प्राणान् वायु-भेदान् प्राणेषु एव जुह्वति। यस्य यस्य वायोर्जयः क्रियते[१६] इतरान् वायुभेदांस्तस्मिन् तस्मिन् जुह्वति। ते तत्र प्रविष्टा इव भवन्ति। सर्वेप्येते यज्ञविदः यज्ञ-क्षपितकल्मषाः यज्ञैर्यथोक्तैः क्षपितो नाशितः कल्मषो येषां ते यज्ञ-क्षपित-कलमषाः।। ३० ।।

[16] स्वाधीनो भवति।

एवं यथोक्तान्यज्ञान् निर्वर्त्य -

**यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।**

**नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम।। ३१ ।।**

कुरुसत्तम यज्ञशिष्टामृतभुजो सनातनं ब्रह्म यान्ति । अयज्ञस्य अयं लोकः न अस्ति। अन्यः कुतः।। ३१ ।।

O Best among the *Kurus*, those who partake of the nectar (the result) that is left over after the *yajña*, reach the eternal *Brahman*. For the one who does not perform *yajña*, nothing (is gained) in this world. How, then, (can anything be gained) in any other (world)?

यज्ञशिष्टेति। यज्ञशिष्टामृतभुजः यज्ञानां शिष्टं यज्ञ-शिष्टं, यज्ञ-शिष्टं च तदमृतं च यज्ञ-शिष्टामृतं, तद्

भुञ्जत इति यज्ञ-शिष्टामृत-भुजः। यथोक्तान् यज्ञान्कृत्वा तच्छिष्टेन कालेन यथा-विधि

चोदितमन्नममृताख्यं भुञ्जत इति यज्ञ-शिष्टामृत-भुजः।

यान्ति गच्छन्ति ब्रह्म सनातनं चिरन्तनं मुमुक्षवश्चेत्।

कालातिक्रमापेक्षयेति[१७] सामर्थ्याद् गम्यते।

नायं लोकः सर्व-प्राणि-साधारणोऽपि अस्ति यथोक्तानां यज्ञानामेकोऽपि यज्ञो यस्य नास्ति सः

अयज्ञः तस्य, कुतोऽन्यः विशिष्ट-साधन-साध्यः कुरुसत्तम।। ३१ ।।

[17] गतिनिर्देशसामर्थ्याद् क्रममुक्तिरत्राभिप्रेता इत्याह - कालातिक्रमापेक्षया इति। (आ.गिरि)

**एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।**

**कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे।। ३२ ।।**

एवं बहुविधा यज्ञाः ब्रह्मणो मुखे विततः। तान् सर्वान् कर्मजान् विद्धि । एवं ज्ञात्वा विमोक्ष्यसे ।। ३२ ।।

In this manner, many and varied *yajñas,* religious disciplines, are very elaborately mentioned in the words of the Veda. Understand them all to be born of *karma* (and therefore, *anātmā*). Knowing thus, you will be liberated.

एवमिति। एवं यथोक्ता बहुविधाः बहु-प्रकाराः यज्ञाः विततः विस्तीर्णाः ब्रह्मणो वेदस्य मुखे द्वारे। वेदद्वारेणावगम्यमानाः "ब्रह्मणो मुखे विततः" उच्यन्ते। "तद्यथा वाचि हि प्राणं जुहुम" (ऐ.आ. ३.२.६) इत्यादयः। कर्मजान् कायिक-वचिक-मानस-कर्मोद्भवान् विद्धि तान् सर्वान् अनात्मजान्। निर्व्यापारो ह्यात्मा। अत एवं ज्ञात्वा विमोक्ष्यसे अशुभात्। "न मद्व्यापारा इमे निर्व्यापारोऽहमुदासीनः" इत्येवं ज्ञात्वा अस्मात्सम्यग्दर्शनाद् मोक्ष्यसेऽशुभात् संसार-बन्धनादित्यर्थः।। ३२ ।।

“ब्रह्मार्पणम्” (गी ४.२४) इत्यादि-श्लोकेन सम्यग्दर्शनस्य यज्ञत्वं सम्पादितम्। यज्ञाश्चानेक

उपदिष्टाः। तैः सिद्ध-पुरुषार्थ-प्रयोजनैः[१८] ज्ञानं स्तूयते[१९]। कथम् -

**श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप।**

**सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते।। ३३।।**

परन्तप द्रव्यमयाद् यज्ञात् ज्ञानयज्ञः श्रेयान् । पार्थ अखिलं सर्वं कर्म ज्ञाने परिसमाप्यते।। ३३

This discipline of knowledge, O Scorcher of foes, is superior to religious disciplines performed with materials. O *Pārtha*! All action in its entirety, is resolved in knowledge.

श्रेयानिति। श्रेयान् द्रव्यमयाद् द्रव्य-साधन-साध्याद् यज्ञाद् ज्ञानयज्ञः हे परन्तप। द्रव्य-मयो हि यज्ञः

फलस्यारम्भको ज्ञान-यज्ञो न फलारम्भकोऽतः श्रेयान् प्रशस्यतरः।

---

18 लोकतः सिद्धाः पुरुषार्थाः धर्मार्थकामाः प्रयोजनानि येषां ते।

19 यज्ञाः साध्यपुरुषार्थप्रयोजनाः, ज्ञानं सिद्धपुरुषार्थप्रयोजनमिति स्तुतिः।

कथम्? यतः सर्वं कर्म समस्तम् अखिलम् अप्रतिबद्धं पार्थ ज्ञाने मोक्ष-साधने सर्वतः सम्प्लुदोदक-स्थानीये परिसमाप्यते अन्तर्भवतीत्यर्थः।

“यथा कृताय विजितायाधरेऽयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत्किञ्चित् प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद” (छा. ४.१.४) इति श्रुतेः[२०]।। ३३ ।।

[20] गी २.४६ (यावानर्थ...) द्रष्टव्यम्।

तद् एतद्विशिष्टं ज्ञानं तर्हि केन प्राप्यते इति उच्यते -

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**

**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः।। ३४।।**

तद् (ज्ञानप्रा''ासाधनम्) (वदतः मत्तः) विद्धि। प्रणिपातेन परिप्रश्नेन सेवया च (आवर्जिताः) ते ज्ञानिनः तत्वदर्शिनः ज्ञानम् उपदेक्ष्यन्ति ।। ३४

Understand that (which is to be known) by prostrating, by asking proper questions, (and) by service. Those who are wise, who have the vision of the truth, will teach you (this) knowledge.

तद्विद्धीति। तद्[21] विद्धि विजानीहि येन विधिना प्राप्यत इति। आचार्यानभिगम्य प्रणिपातेन प्रकर्षेण नीचैः पतनं प्रणिपातो दीर्घ-नमस्कारः तेन। कथं बन्धः?, कथं मोक्षः?, का विद्या?, का च अविद्या?, इति परिप्रश्नेन, सेवया गुरु-शुश्रूषयैवमादिना।

---

21 तदिति ज्ञानसाधनपरतया बोध्यम्, क्लीबत्वात्। तं विधिमित्यर्थः।

प्रश्रयेण आवर्जिताः[२२] आचार्याः उपदेक्ष्यन्ति कथयिष्यन्ति ते ज्ञानं यथोक्त-विशेषणं ज्ञानिनः।

ज्ञानवन्तोऽपि केचिद्यथावत् तत्त्व-दर्शिन-शीलाः, अपरे न, अतो विशिनष्टि - तत्त्व-दर्शिनः इति।

ये सम्यग्दर्शिनः तैरुपदिष्टं ज्ञानं कार्य-क्षमं भवति नेतरदिति भगवतो मतम्।। ३४ ।।

22 आवर्जितचेतसो वशीकृतचेतसः इत्यर्थः।

तथा च सतीदमपि समर्थं वचनम् -

**यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव।**

**येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि।। ३५।।**

पाण्डव यज्ज्ञात्वा एवं पुनः मोहं न यास्यसि। येन अशेषेण भूतानि मयि द्रक्ष्यसि। अथ आत्मनि। ३५

Knowing this knowledge (which was taught by them[23]) O *Pāṇḍava*, you shall not again be deluded in this manner (and) by this (knowledge) you shall see all beings in yourself and in Me.

यदिति। यद् ज्ञात्वा यद् ज्ञानं तैरुपदिष्टमधिगम्य प्राप्य न पुनः भूयः मोहमेवं यथेदानीं मोहं गतोऽसि पुनरेवं न यास्यसि हे पाण्डव। किञ्च येन ज्ञानेन भूतान्यशेषेण ब्रह्मादीनि स्तम्ब-पर्यन्तानि द्रक्ष्यसि साक्षाद् आत्मनि प्रत्यगात्मनि मत्संस्थानीमानि भूतानीति। अथो अपि मयि वासुदेवे परमेश्वरे च इमानीति क्षेत्रज्ञेश्वरैकत्वं सर्वोपनिषत्प्रसिद्धं द्रक्ष्यसि इत्यर्थः।। ३५ ।।

---

[23] *The jñānīs and tattvadarśīs mentioned in the previous verse.*

किञ्च एतस्य ज्ञानस्य माहात्म्यम् -

**अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः।**

**सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि।। ३६।।**

सर्वेभ्यः पापेभ्यः पापकृत्तमः असि चेद् अपि ज्ञानप्लवेनैव सर्वं वृजिनं सन्तरिष्यसि।। ३६

Even if you are the greatest sinner among all sinners, you will cross all sin with ease by the raft of knowledge alone.

अपीति। अपि चेदसि पापेभ्यः पापकृद्भ्यः सर्वेभ्यः अतिशयेन पापकृत् पापकृत्तमः।

सर्वं ज्ञानप्लवेनैव ज्ञानमेव प्लवं कृत्वा वृजिनं वृजिनार्णवं पापं सन्तरिष्यसि।

धर्मोऽपीह मुमुक्षोः पापमुच्यते।। ३६ ।।

ज्ञानं कथं नाशयति पापमिति सदृष्टान्तमुच्यते -

**यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।**

**ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा।। ३७।।**

अर्जुन यथा समिद्धः अग्निः एधांसि भस्मसात्कुरुते तथा ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते ।। ३७

Just as a well-lighted fire reduces wood to ashes, O *Arjuna*, so too, the fire of knowledge reduces all actions (results of actions) to ashes.

यथेति। यथा एधांसि काष्ठानि समिद्धः सम्यगिद्धो दीप्तो अग्निः भस्मसाद् भस्मीभावं कुरुते हे अर्जुन। एवं ज्ञानमेवाग्निः ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा। निर्बीजं करोतीत्यर्थः[२४]।

न हि साक्षादेव ज्ञानाग्निः तानि कर्माणीन्धनवद् भस्मीकर्त्तुं शक्नोति।

[24] निर्बीजीकरोति इति पाठान्तरम्।

तस्मात् सम्यग्दर्शनं सर्व-कर्मणां निर्बीजत्वे कारणमित्यभिप्रायः[२५]।

सामर्थ्याद् येन कर्मणा शरीरमारब्धं तत् प्रवृत्त-फलत्वाद् उपभोगेनैव क्षीयते।

"तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" (छा. ६.१४.१) इति श्रुतेः[२६]।

अतः यान्यप्रवृत्त-फलानि ज्ञानोत्पत्तेः प्राक् कृतानि ज्ञान-सहभावीनि चातीतानेक-जन्म-कृतानि च

तान्येव सर्वाणि भस्मसात् कुरुते।। ३७।।

---

[25] ज्ञानं साक्षादज्ञानमेव नाशयति। अज्ञानं निवर्त्तयत् तज्जन्यकर्त्तृत्वभ्रमं कर्मबीजभूतं निवर्त्तयति।

[26] "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये" इत्येतत् क्वचिन्न दृश्यते।

यत एवम् अतः -

**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।**

**तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति।। ३८।।**

ज्ञानेन सदृशं पवित्रम् इह न हि विद्यते। तत् योगसंसिद्धः स्वयं कालेन आत्मनि विन्दति।। ३८

Therefore, in this world, there is no purifier equivalent to knowledge. One who has in time attained preparedness through *karma-yoga* naturally gains (knowledge) in the mind.

न हीति। न हि ज्ञानेन सदृशं तुल्यं पवित्रं पावनं शुद्धि-करम् इह विद्यते।

तत् ज्ञानं स्वयम् एव योगसंसिद्धः योगेन कर्म-योगेन समाधि-योगेन च संसिद्धः संस्कृतः

योग्यतामापन्नः सन् मुमुक्षुः कालेन महता आत्मनि विन्दति लभत इत्यर्थः।। ३८ ।।

येन एकान्तेन ज्ञानप्राि’’ाः भवति स उपायः उपदिश्यते -

**श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।**

**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।। ३९।।**

श्रद्धावान् तत्परः संयतेन्द्रियः ज्ञानं लभते । ज्ञानं लब्ध्वा परां शान्तिम् अचिरेण अधिगच्छति।। ३९

One who has faith (in the *śāstra* and in the words of the teacher), who is committed to that (knowledge, and) who is master of one's senses gains the knowledge. Having gained the knowledge, one immediately gains absolute peace.

श्रद्धावानिति। श्रद्धावान् श्रद्धालुः लभते ज्ञानम्।

श्रद्धालुत्वेऽपि भवति कश्चिन्मन्द-प्रस्थानोऽत आह तत्परः। गुरूपासनादौ[२७] अभियुक्तः।

ज्ञान-लब्ध्युपाये श्रद्धावान् तत्परोऽप्यजितेन्द्रियः स्यादित्यत आह संयतेन्द्रियः संयतानि विषयेभ्यो

27 गुरूपसदनादौ इति पाठान्तरम्।

निर्वर्त्तितानि यस्येन्द्रियाणि स संयतेन्द्रियः।

य एवं-भूतः श्रद्धावान् तत्परः संयतेन्द्रियश्च सोऽवश्यं ज्ञानं लभते।

प्रणिपातादिः तु बाह्योऽनैकान्तिकोऽपि भवति मायावित्वादि-सम्भवात्।

न तु तच्छ्रद्धावत्वादौ इत्येकान्ततो ज्ञान-लब्ध्युपायः। किं पुनर्ज्ञान-लाभात् स्यादित्युच्यते।

ज्ञानं लब्ध्वा परां मोक्षाख्यां शान्तिमुपरतिम् अचिरेण क्षिप्रमेव अधिगच्छिति।

सम्यग् दर्शनात् क्षिप्रं मोक्षो भवतीति सर्व-शास्त्र-न्याय-प्रसिद्धः सुनिश्चितोऽर्थः।। ३९ ।।

अत्र संशयो न कर्त्तव्यः। पापिष्ठो हि संशयः। कथमित्युच्यते -

**अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।**

**नायं लोकोऽस्ति न परः न सुखं संशयात्मनः।। ४०।।**

अज्ञश्च अश्रद्दधानश्च संशयात्मा विनश्यति। संशयात्मनः अयं लोकः न अस्ति। न परः (अस्ति)। न सुखम् (अस्ति) ।। ४०

One who has no discrimination, and who has no faith (in the *śāstra* and the teacher), and one who has a doubting mind perishes. Because, for the one with a doubting mind, this world is not there, nor the world beyond, nor happiness.

अज्ञश्चेति। अज्ञश्च अनात्मज्ञः अश्रद्दधानश्च गुरु-वाक्य-शास्त्रेष्वविश्वासवान् च संशयात्मा च संशय-चित्तश्च विनश्यति। अज्ञाश्रद्दधानौ यद्यपि विनश्यतः तथापि न तथा यथा संशयात्मा। संशयात्मा तु पापिष्ठः सर्वेषाम्। कथम्? नायं साधारणोऽपि लोकोऽस्ति तथा न परः लोकः न सुखं तत्रापि संशयोत्पत्तेः[२८] संशयात्मनः संशय-चित्तस्य। तस्मात् संशयो न कर्त्तव्यः।। ४० ।।

[28] संशयोपपत्तेः इति पाठान्तरम्।

कस्मात् -

**योगसंन्यस्तकर्माणं ज्ञानसंच्छिन्नसंशयम्।**

**आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय।। ४१।।**

धनञ्जय योगसंन्यस्तकर्माणं ज्ञानसंच्छिन्नसंशयम् आत्मवन्तं कर्माणि न निबध्नन्ति ।। ४१

O *Arjuna*, actions do not bind the one who has renounced action through *yoga*, whose doubts have been completely severed by knowledge (and) the one who is together.

योगेति। योगसंन्यस्तकर्माणं परमार्थ-दर्शन-लक्षणेन योगेन संन्यस्तानि कर्माणि येन परमार्थ-दर्शिना

धर्माधर्माख्यानि तं योग-संन्यस्त-कर्माणम्। कथं येग-संन्यस्त-कर्मेत्यत आह - ज्ञानसंच्छिन्नसंशयम्

ज्ञानेनात्मेश्वरैकत्व-दर्शन-लक्षणेन संच्छिन्नः संशयो यस्य सः ज्ञान-संच्छिन्न-संशयः।

य एवं येग-संन्यस्त-कर्मा तम् आत्मवन्तम् अप्रमत्तं गुण-चेष्टा-रूपेण दृष्टानि कर्माणि न निबध्नन्ति

अनिष्टादिरूपं फलं नारभन्ते हे धनञ्जय।।४१।।

यस्मात् कर्मयोगानुष्ठानादशुद्धि-क्षय-हेतुक-ज्ञान-संच्छिन्न-संशयो न निबध्यते कर्मभिः ज्ञानाग्नि-दग्ध-

कर्मत्वादेव, यस्माच्च ज्ञान-कर्मानुष्ठान-विषये संशयवान् विनश्यति -

**तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः।**

**छित्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत।। ४२।।**

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानकर्मसंन्यासयोगो नाम चतुर्थोऽध्यायः।।

भारत तस्माद् उत्तिष्ठ। अज्ञानसंभूतं हृत्स्थं एनं आत्मनः संशयं ज्ञानासिना छित्वा योगमातिष्ठ। ।। ४२

Therefore, O *Bhārata,* slaying with the sword of knowledge this doubt about the self, which is born of ignorance, which is rooted in the mind, get up (and) take to *yoga* (*karma- yoga*).

तस्मादिति। तस्मात् पापिष्ठम् अज्ञानसम्भूतम् अज्ञानादविवेकाज्ञातं हृत्स्थं हृदि बुद्धौ स्थितं

ज्ञानासिना शोक-मोहादि-दोष-हरं सम्यग्दर्शनं ज्ञानं तदेवासिः खड्गस्तेन ज्ञानासिना आत्मनः

स्वस्य, आत्म-विषयत्वात् संशयस्य। न हि परस्य संशयः परेण[29] च्छेत्तव्यतां प्रा’’ाो येन स्वस्येति

विशेष्यते[30]। अत आत्म-विषयोऽपि स्वस्यैव भवति।

छित्त्वैनं संशयं स्व-विनाश-हेतु-भूतं योगम् सम्यग्दर्शनोपायं कर्मानुष्ठानम् आतिष्ठ कुर्वित्यर्थः।

उत्तिष्ठ च इदानीं युद्धाय भारत इति।। ४२ ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छङ्करभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये चतुर्थोऽध्यायः।।

---

29 अपरेण इति वा।

30 विशेष्येत इति वा।